# Devaih Kritam Katyayani Stotram

# દેવૈઃ કૃતં કાત્યાયનીસ્તોત્રમ્

## Document Information

Text title : Devaih Kritam Katyayani Stotram

File name : devaiHkRRitaMkAtyAyanIstotram.itx

Category : devii, devI, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 168/90-108||

Latest update : December 25, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

December 25, 2025

*sanskritdocuments.org*

# દેવૈઃ કૃતં કાત્યાયનીસ્તોત્રમ્

અથ દેવાઃ સ્તુતિં ચક્રે સમાજે વિજયે તતઃ ।
કાત્યાયનિ! નમસ્તુભ્યં કૌશિકિ! તે નમો નમઃ ॥ ૯૦॥

કાલિકે કાલિ તેઽજસ્રં ચામુણ્ડે તે નમો નમઃ ।
મહામારિ નમસ્તુભ્યં તે બ્રહ્માણિ નમો નમઃ ॥ ૯૧॥

ચાન્દ્રિ ચ વારુણિ કુણ્ડલિનિ તુભ્યં નમો નમઃ ।
ત્રિશૂલિનિ નમસ્તુભ્યં કૌમારિ શક્તિનિ! નમઃ ॥ ૯૨॥

નારસિંહિ શિવદૂતિ! વૈષ્ણવિ! તે નમો નમઃ ।
વારાહિ ચણ્ડિકે ચણ્ડે ચર્મમુણ્ડે ચ તે નમઃ ॥ ૯૩॥

રૌદ્રિ સિંહિ યમદાસિ યામ્યે દેવિ ચ તે નમઃ ।
ઈશાનિ દિક્પ્રપાલે તે નૈરૃતાયૈ ચ તે નમઃ ॥ ૯૪॥

ઐન્દ્રિ ચ વાયવિ ભદ્રે ભગવત્યસ્તુ તે નમઃ ।
નમોઽસ્ત્વનન્તરૂપે તે નમસ્તે રાજ્યદાયિનિ! ॥ ૯૫॥

નમસ્તે દૈત્યદર્પઘ્નિ નમોઽષ્ટાદશબાહવિ ।
નમો નારાયણિ બ્રાહ્મિ ચક્રધારિણિ તે નમઃ ॥ ૯૬॥

નમો વજ્રધરે હસ્તિધ્વજે તેઽસ્તુ નમો નમઃ ।
મયૂરવાહિનિ તેઽસ્તુ નમસ્તે હંસવાહિનિ ॥ ૯૭॥

મુણ્ડમાલે નમસ્તેઽસ્તુ સુકેશિનિ નમોઽસ્તુ તે ।
ત્રિનેત્રે વરદે દેવિ નમસ્તેઽસ્તુ પ્રસીદ ચ ॥ ૯૮॥

પ્રપન્નાઽઽર્તિહરે દેવિ માતઃ પ્રસીદ પાહિ ચ ।
મહીરૂપે સદાધારે જલરૂપે ચ તૃપ્તિદે ॥ ૯૯॥

બીજરૂપે મોહરૂપે મુક્તિરૂપે નમોઽસ્તુ તે ।
વિદ્યારૂપે સમસ્તસ્ત્રીસ્વરૂપે તે નમો નમઃ ॥ ૧૦૦॥

સ્વર્ગમોક્ષપ્રદે દેવિ નારાયણિ નમોઽસ્તુ તે ।
કાલરૂપે તત્ત્વરૂપે કાર્યકારણરૂપિણિ ॥ ૧૦૧॥

ત્રિગુણે નિર્ગુણે દેવિ મહામાયે હૃદિસ્થિતે ।
સર્વાઽન્તર્યામિણિ દેવિ નારાયણિ નમોઽસ્તુ તે ॥ ૧૦૨॥

બ્રહ્માણિ હંસયાનસ્થે શિવાનિ વૃષભસ્થિતે ।
વૈષ્ણવિ ગરુડસ્થે તે નારાયણિ નમોઽસ્તુ તે ॥ ૧૦૩॥

માતૃરૂપે સ્તન્યયુક્તે પત્નીરૂપે સગર્ભિકે ।
રતિરૂપે જીવશાન્તે નારાયણિ નમોઽસ્તુ તે ॥ ૧૦૪॥

યુગે યુગે મહાઽસુરોપદ્રવનાશનં કુરુ ।
દેવાનાં રક્ષણં ચૈવ નારાયણિ નમોઽસ્તુ તે ॥ ૧૦૫॥

શરણ્યાનાં સદા બાધાઘાતનં કુરુ સર્વથા ।
ત્રિશૂલં સર્વદા ભીતેઃ પાતુ દેવિ નમોઽસ્તુ તે ॥ ૧૦૬॥

ઘણ્ટા પાતુ ચ પાપેભ્ય ખડ્ગઃ સુખં કરોતુ ચ ।
પાશાદ્યાસ્તે સદા પાન્તુ નશ્ચ દેવિ નમોઽસ્તુ તે ॥ ૧૦૭॥

સૃષ્ટૌ સદા ત્વયા કાર્યમેવમેવ તુ રક્ષણમ્ ।
રક્ષણાય સદા દેવિ પ્રસન્નાઽસ્તુ નમોઽસ્તુ તે ॥ ૧૦૮॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાને ૧૬૮-અધ્યાયાન્તર્ગતં
દેવૈઃ કૃતં કાત્યાયનીસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૧૬૮/૯૦-૧૦૮॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 168/90-108..

Proofread by PSA Easwaran

*Devaih Kritam Katyayani Stotram*

pdf was typeset on December 25, 2025

Please send corrections to *sanskrit@cheerful.com*